## निव्यभिभ्योऽड्व्यवाये वा छन्दसि । (११७/३६४७)

नि वि अभि इत्येतेभ्यः उपसर्गेभ्यः उत्तरस्य सकारस्य अड्व्यवाये[1] छन्दसि विषये मूर्धन्यादेशो न भवति वा । न्यषीदत् पिता नः, [2]न्यसीदत् । व्यषीदत् पिता नः, [3]व्यसीदत् । अभ्यषीदत्, अभ्यसीदत् । सदिष्वञ्जोरिति [4]तदिह नानुवर्तते । सामान्येनैव [5]तद्वचनम्[6] । व्यष्टौत्, व्यस्तौत्,[6] अभ्यष्टौत्, अभ्यस्तौत् इत्येतदपि सिद्धं भवति ॥

इति [8]वामनकाशिकायां वृत्तौ
अष्टमाध्यायस्य तृतीयः पादः ।

———o———

1. सति इत्यधिकम् क. 2–3. पिता नः इत्यधिकम् ब. क. 4. एतदिह क. 5. विधानम् ब. क.
6. तेन अन्यदपि भवति इत्यधिकम् ब. क. 7. न्यष्टौत् न्यस्तौत् इत्यधिकम् ब. 8. वामन नास्ति क.